International Journal of Sanskrit Research 2019; 5(5): 19-21

International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2019; 5(5): 19-21
© 2019 IJSR
www.anantaajournal.com
Received: 14-07-2019
Accepted: 18-08-2019

Pankaj Kumar Mahana
Ph.D. Sanskrit Scholar,
Department of in Sanskrit,
North Orissa University, 2nd Campus, Keonjhar, Odisha, India

Correspondence
Pankaj Kumar Mahana
Ph.D. Sanskrit Scholar,
Department of in Sanskrit,
North Orissa University, 2nd Campus, Keonjhar, Odisha, India

# भारते धर्मनिरपेक्षता: एका विहङ्गमदृष्टिः

Pankaj Kumar Mahana

## Introduction

भारते सर्वेऽपि मनुष्याः धर्ममार्गेणैव नैव गच्छन्ति । तैनैव संसारेऽस्मिन् ते दुःखेन क्वचित् पीडिताः भवन्ति । आधुनिककाले मनुष्याणां सुखदुःखयोः कारणं किमिति जिज्ञासायां वक्तुं शक्यते यत् मानवः क्वचित् कुपथम् आश्रीयते। तथा अधर्मस्य मार्गस्याश्रयेण गच्छति सः । परन्तु यदि धर्ममार्गस्य पथमनुश्रीयते तर्हि सः सततं सुखेन जीवितुं शक्नोति ।

“धर्मेण हीनाः पशुभिः समानाः” अनेन सिद्धान्तेन सर्वैरपि मनुष्यैः सुखेन जीवितुमेव धर्ममार्गस्यानुसरणं कर्तव्यम् । संस्कृतवाङ्मये नैकेषु काव्येषु शास्त्रेषु च एतस्य धर्मस्य विषये तथा धर्मनिरपेक्षतायाः विषये नैकान्यूदाहरणानि निरूपितानि सन्ति । को समुचितः धर्ममार्गः? एतस्य प्रश्नस्यापि समाधानं नैकेषु स्मृतिग्रन्थेषु काव्येषु च कृतमस्ति । भारतमस्माकं राष्ट्रम् । यत्र सर्वेषामपि धर्माणां कृते समानरूपेणैव अधिकारोऽस्ति। तदर्थमेव भारतं धर्मनिरपेक्षराष्ट्ररूपेण विज्ञायते ।

धर्मनिरपेक्षवादः कश्चन पाश्चात्यवादी चिन्ताधारा भवति। एतस्योत्पत्तिः यूरोपीदेशेषु अभूत् । साधारणजनैः सह राष्ट्रं तथा चर्चजनानां मध्ये परस्परं उत्पादितेन विवादेनैव धर्मनिरपेक्षवादस्य जन्म अभूत् । धर्मनिरपेक्षवादः इति शब्दोऽयं लाटिन् भाषायाः (Seaculum) सिएकूलम् शब्दात् आगतम् । यस्यार्थो भवति इदानीन्तनः युगः (Present age), यः पूर्वम् ऐश्वरीकसमयात् भिन्नमस्ति । धर्मनिरपेक्षताशब्दोऽयं जर्ज जाकब् होलिओक् महाभागेन 1851 तमे ख्रीष्टाब्दे व्यवहृतम्।

भारते धर्मनिरपेक्षता केवलं धार्मिगोष्ठीषु (Inter Religious groups) साम्यं नेच्छति, अपि तु आन्तर्धार्मिकगोष्ठीष्वपि साम्यमिच्छति ।

हिन्दुधर्मस्य जनानां परस्परं प्रभेदं दृश्यते । विशेषरूपेण अनुसूचितजातिः जनजातिः तथा महिलानां धार्मिकदृष्ट्या समानाधिकारं स्वातन्त्र्यं च नैव परिलक्ष्यते । धर्मनिरपेक्षता एतादृशं प्रभेदपूर्णनीतिनां विरोधी अस्ति ।

### धर्मशब्दस्य व्युत्पत्तिः लक्षणञ्च

धर्मशब्दऽयं धृ धारणपोषणयोः इत्यनेन धातुना मनिन् प्रत्यये निष्पद्यते । धर्ममार्गस्य आश्रयेणैव सर्वाः प्रजाः सुखेन निवसन्ति। धर्मेणैव प्रजानां संरक्षणं कर्तुं प्रभवति राजा । धर्मस्य परिभाषा महाभारते पितामहेन भीष्मेन इत्थं दत्तं वर्तते । तथाहि

धारणाद्धर्ममित्याहुः धर्मो धारयते प्रजाः ।
यः स्यात् धारणसंयुक्तः स धर्म इति निश्चयः ।।

भगवान् मनुः धर्मस्य क्वचित् चतुर्धा, क्वचिच्च दशधा लक्षणमकरोत् । तेन मनुस्मृतौ द्वितीयाध्याये उक्तं यथा –

वेदः स्मृतिः सदाचारः स्वस्य च प्रियमात्मनः ।
एतच्चतुर्विधं प्राहुः साक्षाद्धर्मस्य लक्षणम् ।। [1]

आचार्यः मनुः धर्मस्य पुनः दशधा लक्षणं निरूपयति मनुस्मृतौ । तथाहि –

धृतिः क्षमा दमोऽस्तेयं शौचमिन्द्रियनिग्रहः ।
धीर्विद्या सत्यमक्रोधो दशकं धर्मलक्षणम् ।। [2]

आचार्यः मनुः पूर्वं निरूपितानां धर्मस्य दशलक्षकानां पठनेन परिपालनेन च ब्राह्मणाः परमागगतिं (साक्षात् मोक्षम्) प्राप्नुवन्ति। तदर्थं धर्ममार्ग एव सर्वश्रेष्ठमार्गेति वक्तुं शक्यते । प्रसङ्गेऽस्मिन् उक्तं यथा-

दशलक्षणानि धर्मस्य ये विप्राः समधीयते ।
अधीत्य चानुवर्तन्ते ते यान्ति परमां गतिम् ।। [3]

**को नाम धर्मनिरपेक्षता**

धर्मनिरपेक्षतावादस्योत्पत्तिः यूरोपीयमहादेशात् अजायत । एतस्याः पृष्ठभूमिः पुनर्जागरणः (Renaissance) धार्मिकसंस्कारः (Reformation) तथा चर्च (धर्मयाजकः) तथा राष्ट्रयोर्मध्ये विवाद एव ।

लाटिन् भाषायाः (Seaculum) सिएकूलम् शब्दात् Secularism इति शब्दः समुत्पन्नः । यस्य संस्कृते धर्मनिरपेक्षता इत्यर्थो भवति। यदि विचार्यते तर्हि शब्दस्यार्थो आङ्गलभाषया इत्थं वक्तुं शक्यते।तथाहि

1. Secularism means the absence of a state sponsored religion.
2. Absence of a theocratic state which is ruled by the commands of the religion what stands recognized as the state religion.
3. Separation between religion and state. Neither the state interferes in the affairs a religion nor religious interferences in state policies and laws is accepted.
4. No discrimination on the basic of religion. Public policies are neither formulate nor classified on the basic of religion.

एतस्य धर्मनिरपेक्षतावादस्य व्यवहारः प्रप्रथमं जर्ज ज्याकब् हलिओक् महाभागेन 1851 तमे ख्रीष्टाब्दौ कृतः । अस्माकं भारते ये ये अनेकधर्माबलम्बिनः जनाः सन्ति तेषां धर्माणां कस्यापि उपरि अश्रद्धा नैव कर्तव्या तथा सर्वेषां धर्माणां कृते सम्मानदृष्टिः स्थापनीया। तदेव धर्मनिरपेक्षतावादः भवति। तदर्थं भारतम् एकं धर्मनिरपेक्षराष्ट्ररूपेण ज्ञायते ।
धर्मनिरपेक्षताशब्दः मुख्यरूपेण धार्मिकचिन्ताधारया सम्बद्धितः कश्चन आदर्शवादोऽस्ति।धर्मनिरपेक्षता विज्ञानभित्तिकः विवेकवादी, तथा युक्तियुक्तचिन्ताधारां प्रेरयति। धर्मनिरपेक्षतावादः नैकेषु धर्मेषु परस्परं साम्यमिच्छति ।

**भारते धर्मनिरपेक्षतायाः परिशीलनम्**

भारतम् अस्माकं धर्मनिरपेक्षराष्ट्ररूपेण विराजते, इति सर्वे जानन्ति । अस्माकं राष्ट्रं सर्वेषां धर्माणां कृते समानरूपेणैव स्वातन्त्र्यं विदधाति । तदर्थमेव भारते हिन्दुजनैस्सह अन्ये मुस्लिम्,ख्रीष्टादयः धर्माः तिष्ठन्ति। राजनैतिकदृष्ट्या धर्मनिरपेक्षतायाः अर्थो भवति यत् राष्ट्रं स्वीयकार्येण धर्मात् स्वातन्त्र्यं भवेत् । अर्थात् राष्ट्रस्य यत् यत् कर्तव्यं भवति,तदवश्यं कर्तव्यम्। परन्तु तत्र कस्यापि धर्मस्य उपरि वाधा आक्षेपः वा नैव कर्तव्यः । पाश्चात्यानां धर्मनिरपेक्षतानीतितः भारतीयनीतिः क्वचित् भिन्ना भवति । अत्र राष्ट्रस्य कोऽपि धर्मः नास्ति। राष्ट्रस्य कृते सर्वेऽपि धर्माः समानाः भवन्ति। धर्मनिरपेक्षता भारते सर्वेषा धर्माणां कृते समानरूपेण सौविध्यं अवसरञ्च ददाति । राष्ट्रमिदं धार्मिकसंस्काराय एव कार्यं करोति । 1967 तमे ख्रीष्टाब्दे 42 तमे संविधानस्य संशोधनेन धर्मनिरपेक्षशब्दोऽयं भारतीयसंविधाने योजितम् ।

**भारतीयधर्मनिरपेक्षतायाः वैशिष्ट्यम्**

भारतीयधर्मनिरपेक्षतायाः किमपि विशिष्टं प्रयोजनं वर्तते । तेन अस्य राष्ट्रस्य समुचितराष्ट्रत्वं सिद्ध्यति । भारते धर्मनिरपेक्षतायाः इमानि वैशिष्ट्यानि भवन्ति । तथाहि

1. राष्ट्रं सर्वस्मादपि धर्मात् पृथक् भवितव्यम् ।
2. राष्ट्रं स्वयं धर्मग्रहणं नैव करिष्यति,अपि तु सर्वस्मादपि धर्मात् समानरूपेण दूरत्वं स्थापयित्वा बन्धुत्वभावं प्रदर्शयेत् ।

3. राष्ट्रं सर्वेषामपि धर्माणां संरक्षणं कुर्यात् । तथा समानरूपेण सौविध्यमपि परिकल्पयेत्।
4. राष्ट्रं धार्मिकगोष्ठीनां मध्ये धार्मिकसहनशीलतायाः मनोभावं प्रति प्रेरयेत्।
5. राष्ट्रं धार्मिकवैविध्यस्य भावनां सम्मानयेत् ।तथा तस्य अभिवृद्धये कार्यं कुर्यात् ।
6. राष्ट्रं सर्वान्नपि लोकान् धार्मिकस्वातन्त्र्यं प्रददात्।(धारा 25)

सर्वस्यापि धर्मस्य लोकेभ्यः धार्मिकस्वातन्त्र्यं भवेत्।लोकाः निजेच्छानुसारेण यः कोऽपि धर्मः स्वीकुर्युः । तथा तस्यैव धर्मस्य प्रचारः प्रसारश्च कुर्यात् । तत्र राष्ट्रधर्मयोर्मध्ये भेदः नैव भवेत् । धर्मः राजनीतिश्च स्वस्वक्षेत्रे स्वातन्त्र्येण कार्यं कुर्युः । तत्र एकस्योपरि अपरस्य आक्षेपः नैव भवेत्। एतादृशाः केचन नियमाः भारते धर्मनिरपेक्षतायाः विषये क्वचित् परिलक्ष्यन्ते । तदत्र किञ्चिच् विचारितम् ।

## धर्मनिरपेक्षराष्ट्रम् (Secular State)

धर्मात् राजनीतेः भिन्नत्वं धर्मनिरपेक्षतायाः लक्ष्यं भवति।एतादृशं लक्ष्यं उद्देश्यं च परिपूरणाय धर्मनिरपेक्षराष्ट्रम् आवश्यकम् ।धर्मदृष्ट्या राष्ट्रं निरपेक्षनीतेः अनुसरणं कुर्यात् । धर्मनिरपेक्षराष्ट्रस्यार्थो भवति धर्मः राष्ट्रं च परस्परं भिन्नः सन् स्वस्वक्षेत्रे कार्यं करिष्यति।कस्यापि धर्मस्य प्रसाराय प्रचाराय च राष्ट्रं न चिन्तयेत्। धर्मः एकं व्यक्तेः स्वतन्त्र्यं चिन्तनं यत्र राष्ट्रस्याक्षेपः नैव भवेत्। नैकेषु धर्मेषु विद्यमानानि मतान्तराण्यपि दूरे संस्थाप्य राष्ट्रं सर्वेषामपि धर्माणां कृते समाना दृष्टिः स्थापयेत् । एददेव धर्मनिरपेक्षराष्ट्रस्य लक्षणं भवति । अस्माकं आरते एतदेव प्रचलत्यधुना । तेन राष्ट्रमिदं (भारतम्) धर्मनिरपेक्ष्यराष्ट्ररूपेण सर्वे देशाः जानन्ति।
भारते सर्वेषां धर्माणां कृते समानरूपेणैव सम्मानं प्रदीयते । तेन राष्ट्रस्यास्य समुचितत्वं सिद्ध्यति । प्रसङ्गेऽस्मिन् आङ्गलभाषया वक्तुं शक्यते यत्

1. Indian view of secularism strongly upholds the thesis of equal respect of all religions “Sarva Dharma Sambhav“ is the central theme if Indian Secularism.
2. Equal rights and opportunities for all religious communities.
3. अस्माकं भारते धर्मनिरपेक्षताया इदमेव वैशिष्ट्यं सर्वेषाम् अन्येषां धर्मान्तराणां जनानां दृष्टिपथम् आकर्षयति ।

## उपसंहार

एवञ्च यदि सूक्ष्मरूपेण विचारयामस्तर्हि भारते धर्मनिरपेक्षतायाः वैशिष्ट्यं सर्वोपरि वर्तत इति वक्तुं शक्नुमः । विश्वस्मिन् अस्मिन् यानि यानि राष्ट्राणि विलसन्ति। तेषु अस्माकं भारतमेव सर्वोत्कृष्टं स्थानमाप्नोतीति कथने नातिशयोक्तिः । सर्वेषामपि धर्माणां कृते अस्माकं राष्ट्रं समानरूपेण दृष्टिं स्थापयति । विभिन्नतायाम् ऐक्यभावनापि अस्माकं राष्ट्रस्य मूलं मन्त्रो भवति। अर्थात् यद्यपि राष्ट्रेऽस्मिन् बहवः धर्माबलम्बिनः जनाः निवसन्ति,तथापि परस्परं मिलित्वा ते जीवन्त्वति आस्माकं सर्वेषामपि भारतीयानां मतं भवति ।
संस्कृतभाषापि सर्वेभ्यः शिक्षेति यत्

सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामयाः
सर्वे भद्राणि पश्यन्तु मा कश्चित् दुःखभाक् भवेत् ।।

मन्त्रेऽस्मिन् कस्यापि धर्मस्य एकस्य वा संरक्षमोपायः नास्ति । अपि च सर्वेषामपि धर्माणां संरक्षणमस्माकं कर्तव्यव्यमेव भवति।

**पादटीप्पणी**

1. मनु. 2.12
2. मनु. 2.92
3. मनु. 2.93

**सहायकाग्रन्था**

1. श्रीमद्भगवद्गीता
2. मनुस्मृतिः
3. याज्ञवल्क्यस्मृतिः